11 | 2020 Wednesday March

071-295 • WK 11

महा वि० का नाम

आ० नि० सं० म० वि० रहीमपुर, खगड़िया।

दिनाङ्क - 2.7.2020

शास्त्री प्रथम खण्ड (साहित्य)

अनिवार्य प्रथम पत्र व्याकरण

(प्रतिष्ठा)

विषय → कृदन्त कृत्य प्रक्रिया - प्रकरणम्

धातोः → आ तृतीयाध्याय समाप्तेर्ये प्रत्ययास्ते धातोः परे स्युः। कृदतिङिति कृत्संज्ञा।

"वाऽसरूपोऽस्त्रियाम्" अस्मिन् धात्वधिकारे ऽसरूपोऽपवाद प्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना। "कृत्याः" ण्वुल् तृचाविव्यतः प्राक् कृत्य संज्ञाः स्युः। "कर्तरि कृत्" → कृत्प्रत्यय कर्तरि स्यात्। इति प्राप्ते - "तयोरेव कृत्यक्तखलर्थाः" - एते भाव कर्मणोरेव स्युः। "तव्यत्तव्यानीयरः" धातोरेते प्रत्ययाः स्युः। एधितव्यम् एधनीयं त्वया भावे औत्सर्गिकमेकवचनम् क्लीबत्वं च। चेतव्य श्चयनीयो वा धर्मस्त्वया।

प्रयोगः → एधितव्यम् - अत्रेदं बोध्यम् → त्वमेधितव्यम् एधितव्या वा त्वया एधनीयम् त्वया एध्यताम् - एधेत वा त्वया एधितव्यम् एधनीयम् वैते सर्वे लिङ् लोट् कृत्य प्रत्ययाः → समानार्थ प्रतिपादकाः। अत्र एध धातोरकर्मकत्वात् भावे 'तयोरेव कृत्य-' इति नियमात् "तव्यत्तव्या" - इति तव्य प्रत्यये, कृदन्त त्वात् प्रातिपदिकत्वेन सु अम् आदि कृते उक्त रूपस्य सिद्धिः।

9.00 10.00 11.00 12.00 1.00 2.00 3.00 4.00 5.00 6.00 7.00

NOTES

"केलिमर उपसंख्यानम्" — पचेलिमा माषाः। पक्तव्या इत्यर्थः। भिदेलिमा सरलाः। भेत्तव्या इत्यर्थः। कर्मणि प्रत्ययः।

"कृत्यल्युटो बहुलम्" —

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥

स्नात्यनेनेति स्नानीयं चूर्णम्। दीयतेऽस्मै दानीयो विप्रः। "अचो यत्" — अजन्तात् धातोर्यत्। ~~देयम्। ग्लेयम्।~~ चेयम्। "ईद्यति" यति परे आत ईत् स्यात्। देयम्। ग्लेयम्।

~~चेयम्~~ चेयम् — चिञ् चिनु, चयन, चीयताम् — इति वाक्ये चयात् 'चेयम्' इति।

'देयम्' → दा धातोः अचो यत् इति यति तकार लोपे "ईद्यति" इति धातोराकारस्य ईत्वे सार्वधातुकार्धधातुकयोः इति गुणे ~~वि~~ विभक्तिकार्ये च देयम् इति।

'एतिस्तु' — इण् गतौ, ष्टुञ् स्तुतौ, शासु अनुशिष्टौ, वृञ् वरणे — दृङ् आदरे। जुषी — प्रीतिसेवनयोः एभ्यः क्यप् स्यात्। "ह्रस्वस्य पिति कृति तुक्" — इत्यः स्तुत्यः। शासु अनुशिष्टौ। "शास इदङ्हलोः" — शास उपधाया इत्स्यादङि हलादौ किङति। शिष्यः। वृत्यः। आदृत्यः। जुष्यः।

दिनेश प्र० सिंह
(एसोसियेट प्रोफेसर
(व्याकरण)